Stotra Literature:  Meaning and Meter

What is Stotra?

Why do we talk to or about the Divine?

अतीतः पन्थानं  तव च महिमा वाङ्मनसयोर्
अतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥२॥

(2.)   atītaḥ panthānaṁ tava ca mahimā vāṅ-manasayor
atad-vyāvṛttyā yaṁ cakitam abhidhatte śrutir api
sa kasya stotavyaḥ kati-vidha-guṇaḥ kasya viṣayaḥ
pade tvarvācīne patati na manaḥ kasya na vacaḥ

शान्तं शाश्वतमप्रमेयमनघं निर्वाणशान्तिप्रदं
ब्रह्माशम्भुफणीन्द्रसेव्यमनिशं वेदान्तवेद्यं विभुम् ।
रामाख्यं जगदीश्वरं सुरगुरुं मायामनुष्यं हरिं
वन्देऽहं करुणाकरं रघुवरं भूपालचूडामणिम् ॥१॥

śāntaṁ śāśvatam aprameyam anaghaṁ nīrvāṇa–śānti–pradaṁ
brahmā–śambhu-phaṇīndra–sevyam aniśaṁ vedānta–vedyaṁ vibhum
rāmākhyaṁ jagad–īśvaraṁ sura-guruṁ māyā-manuṣyaṁ hariṁ
vande'haṁ karuṇākaraṁ raghu-varaṁ bhūpāla–cūḍāmaṇīm

vidyud-udyotvat-prasphurad-vāsasaṁ
prāvṛad-ambhodavat prollasad-vigraham
vanyayā mālayā śobhitorasthalaṁ
lohitāṅghri-dvayaṁ vārijākṣaṁ bhaje

शरणं भवन्तम् अतिकारुणिकं भव भक्तिगम्यमधिगम्य जनाः ।
जितमृत्यवोऽजित भवन्ति भये ससुरासुरस्य जगतः शरणम् ।। १ ।।

śaraṇaṁ bhavantam atikāruṇikaṁ bhava bhakti-gamyam adhigamya janāḥ
jita-mṛtyavo'jita bhavanti bhaye sasurāsurasya jagatah śaraṇam

सर्वं मे शिवसत्यसुन्दरमयं स्तात् पूरितं काङ्क्षितं
नाभावः क्वचिदिन्दिरे मम पथो रुन्ध्याद् गतेः सात्त्विकान् ।
धर्मार्थौ सुहृदौ सदैव भवतां मुन्मङ्गलाधायकौ
श्रद्धां भक्तिमतीं प्रदाय सुहितां दत्तां मनोवाञ्छितम् ॥६॥

(6.) sarvaṁ me śiva-satya-sundaramayaṁ stāt pūritaṁ kāṅkṣitaṁ
nābhāvaḥ kvacid indire mama patho rundhyād gateḥ sāttvikān
dharmārthau suhṛdau sadaiva bhavatāṁ mun-maṅgalādhāyakau
śraddhāṁ bhaktimatīṁ pradāya suhitāṁ dattāṁ mano-vāñchitam

महतः परितः प्रसर्पतस्तमसो दर्शनभेदिनोभिदे ।
दिननाथ इव स्वतेजसा हृदयव्योम्नि मनागुदेहि नः॥३॥

(3.) mahataḥ paritaḥ prasarpatas tamaso darśana-bhedino bhide
dina-nātha iva svatejasā hṛdaya-vyomni manāg udehi naḥ

prācyāṁ rakṣa pratīcyāṁ ca caṇḍike rakṣa dakṣiṇe
bhrāmaṇenātmaśūlasya uttarasyāṁ tatheśvari

आबाधामरणभयार्चिषा चिराय प्लुष्टेभ्यो भव महता भवानलेन ।
निर्वाणं समुपगमेन यच्छते ते बीजानां प्रभव नमोस्तु जीवनाय ॥१८॥

18. ābādhā-maraṇa-bhayārciṣā cirāya
pluṣṭebhyo bhava mahatā bhavānalena
nirvāṇaṁ samupagamena yacchate te
bījānāṁ prabhava namostu jīvanāya

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥७॥

(7.) trayī sāṅkhyaṁ yogaḥ paśupatimataṁ vaiṣnavam iti
prabhinne prasthāne param idam adaḥ pathyam iti ca
rucīnāṁ vaicitryād-ṛju-kuṭila-nānā-patha-juṣāṁ
nṛṇām eko gamyas tvam asi payasām arṇava iva

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥१॥

(1.) na mantraṁ no yantraṁ tadapi ca na jāne stutim aho
na cāhvānaṁ dhyānaṁ tadapi ca na jāne stuti-kathāḥ
na jāne mudrāste tadapi ca na jāne vilapanaṁ

paraṁ jāne mātas tvad-anusaraṇam kleśa-haraṇam

आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि ।
नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरन्ति ॥१०॥

(10.) āpatsu magnaḥ smaraṇaṁ tvadīyaṁ
karomi durge karuṇārṇaveśi
naitacchaṭhatvaṁ mama bhāvayethāḥ
kṣudhātṛṣārtā jananīṁ smaranti

Psalm 73:1 -28 NIV When my heart was grieved and my soul embittered ... I was a brute beast before you.. Yet I am always with you ; you hold me by my right hand.

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥१८॥

śaraṇaṁ taruṇendu-śekharaḥ śaraṇaṁ me giri-rāja-kanyakā
śaraṇaṁ punar eva tāvubhau śaraṇaṁ nānyad upaimi daivatam

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् |
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः ||३||

(3.) satyapi bhedāpagame
nātha tavāhaṁ na māmakīnas tvam,
sāmudro hi taraṅgaḥ,
kvacana samudro na tāraṅgaḥ.

मन्नाथः श्रीजगन्नाथो मद्गुरुः श्रीजगद्गुरुः ।
मदात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः ॥१२

man-nāthaḥ śrījagan-nātho mad-guruḥ śrījagad-guruḥ
madātmā sarva-bhūtātmā tasmai śrīgurave namaḥ (12.)

गुरुरादिरनादिश्च गुरुः परमदैवतम् ।
गुरोः परतरं नास्ति तस्मै श्रीगुरवे नमः ॥१३॥

(13.) gurur ādir anādiśca guruḥ parama-daivatam
guroḥ parataraṁ nāsti tasmai śrīgurave namaḥ

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देवदेवः

tvam eva mātā ca pitā tvam eva
tvam eva bandhuśca sakhā tvam eva
tvam eva vidyā draviṇaṁ tvam eva
tvam eva sarvaṁ mama devadevaḥ